When their ship reached their town, Lilavati and Kalavati had just finished their ritual of Lord Satya Narayana on the beach. Kalavati got up without eating prasadam and ran towards the ocean in excitement. Then it appeared like the ship and her husband sank in the ocean. When she was very sad, a voice told her it was because she did not eat prasadam. When she went back and took prasadam, she saw that the ship and her husband were fine.

When Sadhu found out all this, he was awestruck. He performed the ritual twice every month - on the Full Moon night and solar ingress day. He lived happily ever after and reached Satya Loka at the end of his life.

Chapter 5

A king called Tungadhwaja went to a forest for hunting and saw some forest dwellers performing the ritual of Lord Satya Narayana under a banyan tree. He was not impressed by their idols and vessels made of clay. When they respectfully gave him prasadam, he threw it away and left. Lord wanted to teach him a lesson.

His enemies surprised him by getting together and attacking him. He lost his kingdom, wealth and children. He regretted that he had insulted Lord Satya Narayana because of his lowly impresseion of those forest dwellers. He went back to the forest, found them, sat along with them and performed a ritual of Lord Satya Narayana with the same clay idols and vessels used by them and ate the prasadam made by them. He went back to his city, collected some loyal soldiers and attacked his enemies. They were not ready and lost the battle. He got back his kingdom, wealth and many children were born again. He lived happily ever after and reached Satya Loka at the end of his life.

Sage Soota said, "O great sages, this ritual of Lord Satya Narayana gives direct results in Kali yuga. By performing it or watching it, human beings can overcome their problems."

...Thus ends the story of the ritual of Lord Satya Narayana from Reva khanda of Skanda Purana...

[***Some quick commentary*****:** The four stories cover people of four varnas (castes). The lesson is that people of all varnas can perform this ritual. The wood cutter learnt the ritual from brahmana and did it himself. Even a shudra can perform this ritual by oneself.

One word of caution on varnas/castes is needed here. One who has affinity to knowledge is a brahmana (learned man). One who has affinity to power and authority is a kshatriya (warrior). One who has affinity to money is a vaisya (trader). One who has affinity to carnal pleasures is a shoodra (worker). One gets varna from father's varna by default, but one's own varna comes out as one's personality develops. If a person born in a brahmana family is after money, he becomes a vaisya and not a brahmana. On the other hand, if a person born in a shudra family desires nothing but knowledge and self-realization, he automatically becomes a brahmana.

When we say that people of all varnas can do this ritual, what we really mean is that people seeking knowledge or power or money or pleasures can do this ritual and get what they want.

If one looks carefully, there are lessons on things to watch out. For example, businessman tried to do business with god and asked for a child to be given first. Even after getting it, he did not do the ritual and postponed. If one has the attitude of a vaisya, one should suppress the urge to *negotiate* when dealing with god. Similarly, king was egoistic on account of his power. If one has the attitude of a kshatriya, one should suppress the urge to be *proud* when dealing with god.]

Appendix B1: Generic Panchopachara Pooja

[*If you want to perform a panchopachara pooja (a worship consisting of 5 services) to any deity who may may have been invoked in a kalasha or an idol, please use the procedure in this appendix. This will take less time than shodasopachara pooja (a worship consisting of 16 servives). Replace "*<A mantra of deity>*" below with a mantra of the deity.*]

Part 1

Say the following and offer sandalwood powder/paste to the deity. You can also offer turmeric powder and kumkum.

<A mantra of deity> लं पृथिव्यात्मने नमः । गन्धं समर्पयामि ।

Say the following and offer a flower (or a flower petal) to the deity.

<A mantra of deity> हं आकाशात्मने नमः । पुष्पं समर्पयामि ।

Main Mantra

One can meditate with the main mantra or the main prayer of the deity for a while here.

Part 2

Say the following and offer dhoopam (incense) to the deity. Light the tip of the incense stick, let the fire burn brightly and then extinguish the fire. There should be no fire on the stick but smoke coming from the burning tip. Show the smoke to the deity.

<A mantra of deity> यं वाय्वात्मने नमः। धूपं आघ्रापयामि।

Say the following and show the deepam (light/lamp) to the deity.

<A mantra of deity> रं अग्न्यात्मने नमः। दीपं दर्शयामि।

Say the following and offer some food to Lord Satya Narayana in the idol. You can use cooked food or a fruit or jaggery or sugar. Show it to the idol and kalasham.

<A mantra of deity> वं अमृतात्मने नमः। नैवेद्यं समर्पयामि।

Say the following and offer some akshatas to the deity. This mantra means that we are offering "all services" to the deity.

<A mantra of deity> सं सर्वात्मने नमः। सर्वोपचारान् समर्पयामि।

Now get up and do *pradakshinas* to the deity. If someone stands on the roof (or in the sky) and looks down at you, it should look like you are going around the deity (idol or kalasha) in the clockwise direction. Do one or three rounds and then sit down again in front of deity.

Appendix B2: Generic Shodasopachara Pooja

[*If you want to perform a shodasopachara pooja (a worship consisting of 16 services) to any deity who may may have been invoked in a kalasha or an idol, please use the procedure in this appendix. This will take less time than panchopachara pooja (a worship consisting of 5 servives). Replace "<A mantra of deity>" below with a mantra of the deity.*]

Part 1

Say the line below and think in the mind that you are offering a nice seat to the deity to sit on. While imagining that, just offer a few akshatas to the idol and the kalasha.

<A mantra of deity> आसनं समर्पयामि।

Now, say the line below imagine that you are washing the deity's feet. While imagining that, show a little water with the spoon to the deity and leave the water in a small empty bowl (we will call it “the deposit bowl” from now onwards).

<A mantra of deity> पादयोः पाद्यं समर्पयामि ।

Say the line below, imagine that you are washing the hands of the deity, show a little water in the spoon to the deity and leave it in the deposit bowl.

<A mantra of deity> हस्तयोः अर्घ्यं समर्पयामि ।

Say the line below, imagine that you are offering drinking water to the deity's mouth, show a little water in the spoon to the deity and leave it in the deposit bowl.

<A mantra of deity> मुखे शुद्धाचमनीयं समर्पयामि ।

Say the first sentence below, imagine that you are giving a bath to the deity, show a little water in the spoon to the deity and leave it in the deposit bowl. Say the second sentence below, imagine that you are giving drinking water to the deity's mouth after bath, show a little water in the spoon to the deity and leave it in the deposit bowl.

<A mantra of deity> स्नपयामि । स्नानानन्तरं आचमनीयं समर्पयामि ।

Say the line below, imagine that you are offering a pair of nice clothes (one in the top and one in the bottom, *i.e.* like a shirt and a pant) and offer a few akshatas to the deity and the kalasha.

<A mantra of deity> वस्त्राणि धारयामि ।

Say the line below, imagine that you are offering a yajnopaveetam (sacred thread) and offer a few akshatas to the deity.

<A mantra of deity> यज्ञोपवीतं समर्पयामि ।

Say the line below and offer a little bit of sandalwood paste, turmeric powder, kumkum powder and akshatas to the deity. If you don’t have all these, just sprinkle a few akshatas on the deity.

<A mantra of deity> गन्धान् धारयामि । हरिद्रा कुंकुमं समर्पयामि । अक्षतान् समर्पयामि ।

Say the line below, imagine that you are offering nice jewelry and offer a few akshatas to the deity.

<A mantra of deity> आभरणानि समर्पयामि ।

Sprinkle a few flowers or flower petals or akshatas on the deity.

<A mantra of deity> पुष्पैः पूजयामि ।

Main Mantra

One can meditate with the main mantra or prayer of the deity for a while here.

Part 2

Say the following line and show the incense stick lighted before to the deity.

<A mantra of deity> धूपं आघ्रापयामि ।

Say the following line and show the lamp lighted before to the deity. Then show a little water in the spoon to the deity and leave it in the deposit bowl.

<A mantra of deity> दीपं दर्शयामि । आचमनीयं समर्पयामि ।

Say the first sentence below, show food items you prepared (or fruits) to the deity and imagine that the deity tasted it. If you know the standard procedure of offering *naivedyam* with the Gayatri mantra, you can do it. Else, don't worry and just say the line below. When saying the second sentence, imagine that you are offering a nice *taamboolam* (*paan*) to the deity and offer some akshatas in their place to the idol and the kalasha.

<A mantra of deity> नैवेद्यं समर्पयामि । ताम्बूलं समर्पयामि ।

Place a little camphor on a camphor container or a plate, light it and make a clockwise vertical circle in the air with the plate in front of the deity. Say the line below while you do it.

<A mantra of deity> कर्पूरनीराजनं समर्पयामि ।

Take a small flower (or some akshatas) in your right hand, say the following and offer the flower to the idol (and perhaps a couple of petals into the kalasha). If you know "Narayana Sooktam"

and/or Mantrapushpam (and if you have time), read them first and then say the line below. Otherwise, just this line will do. Imagine that you are offering a flower that captures the essence of all mantras.

<A mantra of deity> मन्त्रपुष्पं समर्पयामि ।

Say the following and bow before the deity mentally. Of course, you can also get up, go around the deity once or thrice and bow down (or kneel down or lie down) in front of the kalasha, if you are not in a hurry. If someone looks at you from the roof or sky, it should look like you are going around the kalasha in clockwise directions.

<A mantra of deity> प्रदक्षिण नमस्कारान् समर्पयामि ।

Appendix C: Sri Mahalakshmi Ashtottara Sata Naama Stotram

This can be included in the "Main Mantra" section optionally. This prayer contains 108 names of goddess Mahalakshmi.

प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदां । श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकां । ।

वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधां । धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीं । ।

अदितिं च दितिं दीप्तां वसुधां वसुधारिणीं । नमामि कमलां कांतां कामां क्षीरोदसंभवां । ।

अनुग्रहपरां बुद्धिं अनघां हरिवल्लभां । अशोकां अमृतां दीप्तां लोकशोकविनाशिनीं । ।

नमामि धर्मनिलयां करुणां लोकमातरं । पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुंदरीं । ।

पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमां । पद्ममालाधरीं देवीं पद्मिनीं पद्मगंधिनीं । ।

पुण्यगंधां सुप्रसन्नां प्रसादाभिमुखीं प्रभां । नमामि चंद्रवदनां चंद्रां चंद्रसहोदरीं । ।

चतुर्भुजां चंद्ररूपां इंदिरां इंदुशीतलां । आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीं । ।

विमलां विश्वजननीं पुष्टिं दारिद्र्यनाशिनीं । प्रीतिपुष्करिणीं शांतां शुक्लमाल्यांबरां श्रियं । ।

भास्करीं बिल्वनिलयां वरारोहां यशस्विनीं । वसुंधरां उदारांगां हरिणीं हेममालिनीं । ।

धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदां । नृपवेश्मगतानंदां वरलक्ष्मीं वसुप्रदां । ।

शुभां हिरण्यप्राकारां समुद्रतनयां जयां । नमामि मंगळां देवीं विष्णुवक्षःस्थलस्थितां । ।

विष्णुपत्नीं प्रसन्नाक्षीं नारायण समाश्रितां । दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रववारिणीं । ।

नवदुर्गां महाकाळीं ब्रह्मविष्णुशिवात्मिकां । त्रिकालज्ञानसंपन्नां नमामि भुवनेश्वरीं । ।

Appendix D: Vishnu Sahasra Nama Stotram

This can be included in the "Main Mantra" section optionally. This prayer contains 1000 names of Lord Vishnu.

विश्वं विष्णुर् वषट्कारो भूतभव्यभवत् प्रभुः। भूतकृद् भूतभृद् भावो भूतात्मा भूतभावनः॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः। अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः। नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः॥

सर्वः शर्वः शिवः स्थाणुर् भूतादिर्निधि रव्ययः। संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः॥

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः। अनादिनिधनो धाता विधाता धातुरुत्तमः॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः। विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः॥

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः प्रभूत स्त्रिककुब्धाम पवित्रं मंगळं परं॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः। हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः। अनुत्तमो दुरादर्षः कृतज्ञः कृतिरात्मवान्॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः। अहस्संवत्सरो व्याळः प्रत्ययः सर्वदर्शनः॥

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादि रच्युतः। वृषाकपि रमेयात्मा सर्वयोगविनिस्सृतः॥

वसुर्वसुमनास्सत्यः समात्मा सम्मितः समः। अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥

रुद्रो बहुशिरा बभ्रुर् विश्वयोनिः शुचिश्रवाः। अमृतः शाश्वतः स्थाणुर् वरारोहो महातपाः॥

सर्वगः सर्वविद्भानुर् विष्वक्सेनो जनार्दनः। वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः॥

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः। चतुरात्मा चतुर्व्यूहः चतुर्दंष्ट्रश्चतुर्भुजः॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः। अनघो विजयो जेता विश्वयोनिः पुनर्वसुः॥

उपेंद्रो वामनः प्रांशुरमोघः शुचिरुर्जितः। अतींद्रः संग्रहस्सर्गो धृतात्मा नियमो यमः॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः। अतींद्रियो महामायो महोत्साहो महाबलः॥

महाबुद्धिर्महावीर्यो महाशक्ति र्महाद्युतिः। अनिर्देश्यवपुः श्रीमान् अमेयात्मा महाद्रिधृक्॥

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः। अनिरुद्धः सुरानंदो गोविंदो गोविदां पतिः॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः। हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः॥

अमृत्युः सर्वदृक्सिंहः संधाता संधिमान् स्थिरः। अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा॥

गुरुर्गुरुतमो धाम सत्य स्सत्यपराक्रमः। निमिषोऽनिमिषः स्रग्वी वाचस्पति रुदारधीः॥

अग्रणीर् ग्रामणीः श्रीमान् न्यायो नेता समीरणः। सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः। अहस्संवर्तको वह्नि रनिलो धरणीधरः॥

सुप्रसादः प्रसन्नात्मा विश्वसृड्विश्वभुग्विभुः। सत्कर्ता सत्कृतस्साधुः जह्नु र्नारायणो नरः॥

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः। सिद्धार्थः सिद्धसंकल्पः सिद्धिदस्सिद्धिसाधनः॥

वृषाही वृषभो विष्णुः वृषपर्वा वृषोदरः। वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः॥

सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः। नैकरुपो बृहद्रुपः शिपिविष्टः प्रकाशनः॥

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः। ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः॥

अमृतांशूद्भवो भानुः शशबिंदु स्सुरेश्वरः। औषधं जगतः सेतुः सत्यधर्मपराक्रमः॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः। कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः॥

युगादिकृद्युगावर्तो नैकमायो महाशनः। अदृश्यो व्यक्तरूपश्च सहस्रजिदनंतजित्॥

इष्टोऽविशिष्टः शिष्टेष्टः शिखंडी नहुषो वृशः। क्रोधहा क्रोधकृत्कर्ता विश्वबाहु र्महीधरः॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः। अपां निधि रधिष्ठान मप्रमत्तः प्रतिष्ठितः॥

स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः। वासुदेवो बृहद्भानुरादिदेवः पुरंदरः॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः। अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः॥

पद्मनाभोऽरविंदाक्षः पद्मगर्भः शरीरभृत्। महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः। सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिंजयः॥

विक्षरो रोहितो मार्गो हेतु र्दामोदर स्सहः। महीधरो महाभागो वेगवानमिताशनः॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः। करणं कारणं कर्ता विकर्ता गहनो गुहः॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः। परर्द्धिः परमस्पष्टः तुष्टः पुष्टः शुभेक्षणः॥

रामो विरामो विरजोमार्गो नेयो नयोऽनयः। वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः॥

वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः। हिरण्यगर्भश्शत्रुघ्नो व्याप्तो वायुरधोक्षजः॥

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः। उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः॥

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम्। अर्थोऽनर्थो महाकोशो महाभोगो महाधनः॥

अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः। नक्षत्रनेमि र्नक्षत्री क्षमः क्षाम स्समीहनः॥

यज्ञ इज्यो महेज्यश्च क्रतुस्सत्रं सतां गतिः। सर्वदर्शी निवृत्तात्मा सर्वज्ञो ज्ञानमुत्तमम्॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्। मनोहरो जितक्रोधो वीरबाहुर्विदारणः॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्। वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम्। अविज्ञाता सहस्रांशुः विधाता कृतलक्षणः॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः। आदिदेवो महादेवो देवेशो देवभृद्गुरुः॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः। शरीरभूतभृत् भोक्ता कपींद्रो भूरिदक्षिणः॥
सोमपोऽमृतपः सोमः पुरुजित् पुरुसत्तमः। विनयो जयः सत्यसंधो दाशार्हः सात्वतां पतिः॥
जीवो विनयिता साक्षी मुकुंदोऽमितविक्रमः। अंभोनिधि रनंतात्मा महोदधिशयोऽन्तकः॥
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः। आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः॥
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः। त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतान्तकृत्॥
महावराहो गोविंदः सुषेणः कनकांगदी। गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः॥
वेधाः स्वांगोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः। वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः॥
भगवान् भगहाऽऽनंदी वनमाली हलायुधः। आदित्यो ज्योतिरादित्यः सहिष्णु र्गतिसत्तमः॥
सुधन्वा खंडपरशुः दारुणो द्रविणप्रदः। दिविस्पृक् सर्वदृग् व्यासो वाचस्पति रयोनिजः॥
त्रिसामा सामगः साम निर्वाणं भेषजं भिषक्। सन्न्यासकृच्छमः शांतो निष्ठा शांतिः परायणं॥
शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः। गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः। श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः॥
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः। श्रीधरः श्रीकरः श्रेयः श्रीमान् लोकत्रयाश्रयः॥
स्वक्षः स्वंगः शतानंदो नंदि ज्योतिर्गणेश्वरः। विजितात्मा विधेयात्मा सत्कीर्ति श्छिन्नसंशयः॥
उदीर्णः सर्वतश्चक्षु रनीशः शाश्वतस्थिरः। भूशयो भूषणो भूतिरशोकः शोकनाशनः॥
अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः। अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः॥
कालनेमिनिहा वीरः शूरः शूरजनेश्वरः। त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः॥
कामदेवः कामपालः कामी कांतः कृतागमः। अनिर्देश्यवपु र्विष्णुः वीरोऽनंतो धनंजयः॥
ब्रह्मण्यो ब्रह्मकृत् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः। ब्रह्मवित् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः॥
महाक्रमो महाकर्मा महातेजा महोरगः। महाक्रतु र्महायज्वा महायज्ञो महाहविः॥
स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोत्रा रणप्रियः। पूर्णः पूरयिता पुण्यः पुण्यकीर्ति रनामयः॥
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः। वसुप्रदो वासुदेवो वसुर्वसुमना हविः॥
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः। शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः॥
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः। दर्पहा दर्पदोऽ दृप्तो दुर्धरोऽथापराजितः॥
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्। अनेकमूर्तिरव्यक्तः शतमूर्तिश्शताननः॥
एको नैकः स वः कः किं यत्तत्पद मनुत्तमम्। लोकबंधु र्लोकनाथो माधवो भक्तवत्सलः॥
सुवर्णवर्णो हेमांगो वरांग श्चंदनांगदी। वीरहा विषमः शून्यो घृताशी रचलश्चलः॥
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृत्। सुमेधा मेधजो धन्यः सत्यमेधा धराधरः॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः। प्रग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः॥

चतुर्मूर्तिश्चतुर्बाहुः चतुर्व्यूहश्चतुर्गतिः। चतुरात्मा चतुर्भावः चतुर्वेदविदेकपात्॥

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः। दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥

शुभांगो लोकसारंगः सुतंतुस्तंतुवर्धनः। इंद्रकर्मा महाकर्मा कृताकर्मा कृतागमः॥

उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः। अर्को वाजसनः शृंगी जयंतः सर्वविज्जयी॥

सुवर्णबिंदु रक्षोभ्यः सर्ववागीश्वरेश्वरः। महाह्रदो महागर्तो महाभूतो महानिधिः॥

कुमुदः कुंदरः कुंदः पर्जन्यः पावनोऽनिलः। अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः॥

सुलभः सुव्रतः सिद्धः शत्रुजित् शत्रुतापनः। न्यग्रोधोदुंबरोऽश्वत्थः चाणूरांध्रनिषूदनः॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः। अमूर्ति रनघोऽचिंत्यो भयकृद्भयनाशनः॥

अणुर्बृहत् कृशः स्थूलो गुणभृन्निर्गुणो महान्। अधृतः स्वधृतः स्वास्थ्यः प्राग्वंशो वंशवर्धनः॥

भारभृत्कथितो योगी योगीशः सर्वकामदः। आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः॥

धनुर्धरो धनुर्वेदो दंडो दमयुता दमः। अपराजितः सर्वसहो नियंता नियमो यमः॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः। अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः॥

विहायसगतिर्ज्योतिः सुरुचिर् हुतभुग्विभुः। रविर्विरोचनः सूर्यः सविता रविलोचनः॥

अनंतो हुतभुक् भोक्ता सुखदो नैकदोऽग्रजः। अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः॥

सनात् सनातनतमः कपिलः कपिरव्ययः। स्वस्तिदः स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः॥

अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः। शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः। विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः॥

उत्तारणो दुष्कृतिहा पुण्यो दुस्स्वप्ननाशनः। वीरहा रक्षणः संतो जीवनः पर्यवस्थितः॥

अनंतरुपोऽनंतश्रीः जितमन्युर्भयापहः। चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः॥

अनादिर् भूर्भुवो लक्ष्मीः सुवीरो रुचिराम्गदः। जननो जनजन्मादिर् भीमो भीमपराक्रमः॥

आधारनिलयोऽधाता पुष्पहासः प्रजागरः। ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः॥

प्रमाणं प्राणनिलयः प्राणधृत् प्राणजीवनः। तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः॥

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः। यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः॥

यज्ञभृत् यज्ञकृत् यज्ञी यज्ञभुक् यज्ञसाधनः। यज्ञान्तकृत् यज्ञगुह्यमन्नमन्नाद एव च॥

आत्मयोनिः स्वयंजातो वैखानस्सामगायनः। देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः॥

शङ्खभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः। रथांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः॥

वनमाली गदी शार्ङ्गी शंखी चक्री च नंदकी। श्रीमान्नारायणो विष्णुर् वासुदेवोऽभिरक्षतु॥

Appendix E: Satya Narayana Ashtottara Shata Nama Stotram

This can be included in the "Main Mantra" section optionally. This prayer contains 108 names of Lord Satya Narayana. There are two versions that are used in different traditions.

Version 1:

ॐ नारायणाय नमः। ॐ नराय नमः। ॐ शौरये नमः। ॐ चक्रपाणये नमः। ॐ जनार्दनाय नमः। ॐ वासुदेवाय नमः। ॐ जगद्योनये नमः। ॐ वामनाय नमः। ॐ ज्ञानपंजराय नमः। ॐ श्रीवभाय नमः। ॐ जगन्नाथाय नमः। ॐ चतुर्मूर्तये नमः। ॐ व्योमकेशाय नमः। ॐ हृषीकेशाय नमः। ॐ शंकराय नमः। ॐ गरुडध्वजाय नमः। ॐ नारसिंहाय नमः। ॐ महादेवाय नमः। १८ ॐ स्वयंभुवे नमः। ॐ भुवनेश्वराय नमः। ॐ श्रीधराय नमः। ॐ देवकीपुत्राय नमः। ॐ हलायुधाय नमः। ॐ सहस्रबाहवे नमः। ॐ अव्यक्ताय नमः। ॐ सहस्राक्षाय नमः। ॐ अक्षराय नमः। ॐ पार्थसारथये नमः। ॐ अच्युताय नमः। ॐ शंखपाणये नमः। ॐ परंज्योतिषे नमः। ॐ आत्मज्योतिषे नमः। ॐ अचंचलाय नमः। ॐ श्रीवत्सांकाय नमः। ॐ अखिलाधाराय नमः। ॐ सर्वलोकपतये नमः। ३६ ॐ प्रभवे नमः। ॐ त्रिविक्रमाय नमः। ॐ त्रिकालज्ञानाय नमः। ॐ त्रिधाम्ने नमः। ॐ करुणाकराय नमः। ॐ सर्वज्ञाय नमः। ॐ सर्वगाय नमः। ॐ सर्वस्मै नमः। ॐ सर्वेशाय नमः। ॐ सर्वसाक्षिकाय नमः। ॐ हरये नमः। ॐ शार्ङ्गिणे नमः। ॐ हरये नमः। ॐ शेषाय नमः। ॐ पीतवाससे नमः। ॐ गुहाश्रयाय नमः। ॐ वेदगर्भाय नमः। ॐ विभवे नमः। ५४ ॐ विष्णवे नमः। ॐ क्षराय नमः। ॐ गजारिघ्नाय नमः। ॐ केशवाय नमः। ॐ केशिमर्दनाय नमः। ॐ कैटभारये नमः। ॐ अविद्यारये नमः। ॐ कामदाय नमः। ॐ कमलेक्षणाय नमः। ॐ हंसशत्रवे नमः। ॐ अधर्मशत्रवे नमः। ॐ काकत्स्थाय नमः। ॐ खगवाहनाय नमः। ॐ नीलांबुदद्युतये नमः। ॐ नित्याय नमः। ॐ नित्यतृप्ताय नमः। ॐ नित्यानन्ददाय नमः। ॐ सुराध्यक्षाय नमः। ७२ ॐ निर्विकल्पाय नमः। ॐ निरंजनाय नमः। ॐ ब्रह्मण्याय नमः। ॐ पृथिवीनाथाय नमः। ॐ निष्कळंकाय नमः। ॐ निराभासाय नमः। ॐ निष्प्रपंचाय नमः। ॐ निरामयाय नमः। ॐ भक्तवश्याय नमः। ॐ महोदाराय नमः। ॐ श्रीमते नमः। ॐ त्रैलोक्यभूषणाय नमः। ॐ यज्ञमूर्तये नमः। ॐ अमेयात्मने नमः। ॐ वरदाय नमः। ॐ वासवानुजाय नमः। ॐ जितेन्द्रियाय नमः। ॐ जितक्रोधाय नमः। ९० ॐ समष्टये नमः। ॐ सनातनाय नमः। ॐ भक्तप्रियाय नमः। ॐ जगत्पूज्याय नमः। ॐ परमात्मने नमः। ॐ असुरान्तकाय नमः। ॐ सर्वलोकानामन्तकाय नमः। ॐ अनन्ताय नमः। ॐ अनन्तविक्रमाय नमः। ॐ मायाधाराय नमः। ॐ निराधाराय नमः। ॐ सर्वाधाराय नमः। ॐ धराधराय नमः। ॐ पुण्यकीर्तये नमः। ॐ पुरातनाय नमः। ॐ त्रिकालज्ञाय नमः। ॐ विष्टरश्रवसे नमः। ॐ चतुर्भुजाय नमः। १०८

Version 2:

ॐ सत्यदेवाय नमः। ॐ सत्यात्मने नमः। ॐ सत्यभूताय नमः। ॐ सत्यपुरुषाय नमः। ॐ सत्यनाथाय नमः। ॐ सत्यसाक्षिणे नमः। ॐ सत्ययोगाय नमः। ॐ सत्यज्ञानाय नमः। ॐ सत्यज्ञानप्रियाय नमः। ॐ सत्यनिधये नमः। ॐ सत्यसम्भवाय नमः। ॐ सत्यप्रभुवे नमः। ॐ सत्येश्वराय नमः। ॐ सत्यकर्मणे नमः। ॐ सत्यपवित्राय नमः। ॐ सत्यमंगलाय नमः। ॐ सत्यगर्भाय नमः। ॐ सत्यप्रजापतये नमः। १८ ॐ सत्यविक्रमाय नमः। ॐ सत्यसिद्धाय नमः। ॐ सत्याच्युताय नमः। ॐ सत्यवीराय नमः। ॐ सत्यबोधाय नमः। ॐ सत्यधर्माय नमः। ॐ सत्याग्रजाय नमः। ॐ सत्यसंतुष्टाय नमः। ॐ सत्यवराहाय नमः। ॐ सत्यपारायणाय नमः। ॐ सत्यपूर्णाय नमः। ॐ सत्यौषधाय नमः। ॐ सत्यशाश्वताय नमः। ॐ सत्यप्रवर्धनाय नमः। ॐ सत्यविभवे नमः। ॐ सत्यज्येष्ठाय नमः। ॐ सत्यश्रेष्ठाय नमः। ॐ सत्यविक्रमिणे नमः। ३६ ॐ सत्यधन्विने नमः। ॐ सत्यमेधाय नमः। ॐ सत्याधीशाय नमः। ॐ सत्यक्रतवे नमः। ॐ सत्यकालाय नमः। ॐ सत्यवत्सलाय नमः। ॐ सत्यवसवे नमः। ॐ सत्यमेघाय नमः। ॐ सत्यरुद्राय नमः। ॐ सत्यब्रह्मणे नमः। ॐ सत्यामृताय नमः। ॐ सत्यवेदाङ्गाय नमः। ॐ सत्यचतुरात्मने नमः। ॐ सत्यभोक्त्रे नमः। ॐ सत्यशुचये नमः। ॐ सत्यार्जिताय नमः। ॐ सत्येंद्राय नमः। ॐ सत्यसंगराय नमः। ५४ ॐ सत्यस्वर्गाय नमः। ॐ सत्यनियमाय नमः। ॐ सत्यमेधाय नमः। ॐ सत्यवेद्याय नमः। ॐ सत्यपीयूषाय नमः। ॐ सत्यमायाय नमः। ॐ सत्यमोहाय नमः। ॐ सत्यसुरानंदाय नमः। ॐ सत्यसागराय नमः। ॐ सत्यतपसे नमः। ॐ सत्यसिंहाय नमः। ॐ सत्यमृगाय नमः। ॐ सत्यलोकपालकाय नमः। ॐ सत्यस्थिताय नमः। ॐ सत्यदिक्पालकाय नमः। ॐ सत्यधनुर्धराय नमः। ॐ सत्याम्बुजाय नमः। ॐ सत्यवाक्याय नमः। ७२ ॐ सत्यगुरवे नमः। ॐ सत्यन्यायाय नमः। ॐ सत्यसाक्षिणे नमः। ॐ सत्यसंवृताय नमः। ॐ सत्यसम्प्रदाय नमः। ॐ सत्यवह्नये नमः। ॐ सत्यवायुवे नमः। ॐ सत्यशिखराय नमः। ॐ सत्यानंदाय नमः। ॐ सत्याधिराजाय नमः। ॐ सत्यश्रीपादाय नमः। ॐ सत्यगुह्याय नमः। ॐ सत्योदराय नमः। ॐ सत्यहृदयाय नमः। ॐ सत्यकमलाय नमः। ॐ सत्यनालाय नमः। ॐ सत्यहस्ताय नमः। ॐ सत्यबाहवे नमः। ९० ॐ सत्यमुखाय नमः। ॐ सत्यजिह्वाय नमः। ॐ सत्यदौंष्ट्राय नमः। ॐ सत्यनाशिकाय नमः। ॐ सत्यश्रोत्राय नमः। ॐ सत्यचक्षसे नमः। ॐ सत्यशिरसे नमः। ॐ सत्यमुकुटाय नमः। ॐ सत्यांबराय नमः। ॐ सत्याभरणाय नमः। ॐ सत्यायुधाय नमः। ॐ सत्यश्रीवभाय नमः। ॐ सत्यगुप्ताय नमः। ॐ सत्यपुष्कराय नमः। ॐ सत्याध्रिदाय नमः। ॐ सत्यभामावतारकाय नमः। ॐ सत्यगृहरूपिणे नमः। ॐ सत्यप्रहरणायुधाय नमः। १०८

Appendix F: Satyadevashtakam

This prayer can be included in the "Main Mantra" section optionally. This prayer contains 8 verses in prayer of Lord Satya Narayana. Please note that this prayer is not from any scripture or composed by any saint, but composed by the author of these manuals. So it may not have any special power. But you can include it if you like it.

श्रीसत्यदेवाष्टकम्

श्रीसत्यलोकपरिपालक हे कृपाळो । देवर्षिमौनिगणभावित सत्त्वमूर्ते ।
श्वेताम्बरावृत रमेश रमाविलोल । श्रीसत्यदेव मम देहि करावलम्बम् ॥
ॐकाररूप गुणवर्जित विश्वयोने । हे पंचभूतपरिपालक लोकरक्ष ।
सम्पूर्णचन्द्रसमये समुपासितव्य । श्रीसत्यदेव मम देहि करावलम्बम् ॥
गौरीशिवाच्युतगणेशपितामहैश्च । खेटैर्नवैः क्रतुशतादिदिगीश्वरैश्च ।
देवैस्सदा सहित शाश्वत लोकपूज्य । श्रीसत्यदेव मम देहि करावलम्बम् ॥
आद्यन्तवर्जित सुरार्चितपादपद्म । श्रीखण्डचर्चित सुवर्चित शोभनांग ।
श्रीपुण्ड्रमण्डितललाट विराट्स्वरूप । श्रीसत्यदेव मम देहि करावलम्बम् ॥
श्रीमत्स्यकूर्मधरणीधरनारसिंह । श्रीवामनेशजमदग्निजरामचन्द्र ।
श्रीकृष्णरूपधर अच्युत विष्णुमूर्ते । श्रीसत्यदेव मम देहि करावलम्बम् ॥
क्षीराब्धिजाप्रिय मनोहरवेषधारिन् । दीनार्तिछेदकर मोदसुभाग्यदायिन् ।
भक्ताघनाश कलिपाशविमोचकारिन् । श्रीसत्यदेव मम देहि करावलम्बम् ॥
कामं च क्रोधमदमात्सरलोभमोहान् । घोरारिषट्कविततिं परिमर्दय त्वं ।
सत्त्वं च शान्तिमतुलं विनयं च देहि । श्रीसत्यदेव मम देहि करावलम्बम् ॥
मद्वाचि मूर्ध्नि हृदि वासय सत्यरूप । लक्ष्म्या च देवततिभिस्सह त्रैगुणात्मन् ।
सत्येन दिव्यसुधया भरितोत्तमांग । श्रीसत्यदेव मम देहि करावलम्बम् ॥
सत्यदेवाष्टकं स्तोत्रम् भक्त्या पठति यो नरः । तस्य पापानि नश्यन्तु सत्यदेव प्रसादतः ॥

Appendix G: Punyaha Vachanam (Pavamana Sooktam)

This prayer requests various deities and rishis to send their subtle essence into the water in kalasha (pot) to make it worthy of invoking the main deity of a pooja (Lord Satya Narayana

here). This YajurVedic prayer is used at the end of Varuna pooja done at the beginning of a lot of traditional rituals.

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शꣳ स्योना भवन्तु॥ यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां। मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शꣳ स्योना भवन्तु॥ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शꣳ स्योना भवन्तु॥ शिवेन मा चक्षुषा पश्यतापश्शिवया तनुवोप स्पृशत त्वचं मे। सर्वाꣳ अग्नीꣳ रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त॥

पवमानस्सुवर्जनः। पवित्रेण विचर्षणिः। यः पोता स पुनातु मा। पुनन्तु मा देवजनाः। पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः। जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देवदीद्यत्। अग्ने क्रत्वा क्रतूꣳ रनु। यत्ते पवित्रमर्चिषि। अग्ने विततमन्तरा। ब्रह्म तेन पुनीमहे। उभाभ्यां देवसवितः। पवित्रेण सवेन च। इदं ब्रह्म पुनीमहे। वैश्वदेवी पुनती देव्यागात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः। तया मदन्तः सधमाद्येषु। वयꣳ स्याम पतयो रयीणां। वैश्वानरो रश्मिभिर्मा पुनातु। वातः प्राणेनेषिरो मयो भूः। द्यावापृथिवी पयसा पयोभिः। ऋतावरी यज्ञिये मा पुनीताम्॥

बृहद्भिः सवितस्तृभिः। वर्षिष्ठैर्देवमन्मभिः। अग्ने दक्षैः पुनाहि मा। येन देवा अपुनत। येनापो दिव्यंकशः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्म पुनीमहे। यः पावमानीरद्ध्येति। ऋषिभिस्संभृतꣳ रसं। सर्वꣳ स पूतमश्नाति। स्वदितं मातरिश्वना। पावमानीर्यो अध्येति। ऋषिभिस्संभृतꣳ रसं। तस्मै सरस्वती दुहे। क्षीरं सर्पिर्मधूदकं॥

पावमानीस्स्वस्त्ययनीः। सुदुघाहि पयस्वतीः। ऋषिभिस्संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितम्। पावमानीर्दिशन्तु नः। इमं लोकमथो अमुम्। कामान् समर्धयन्तु नः। देवीर्देवैः समाभृताः। पावमानीस्स्वस्त्ययनीः। सुदुघाहि घृतश्चुतः। ऋषिभिस्संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितम्। येन देवाः पवित्रेण। आत्मानं पुनते सदा। तेन सहस्रधारेण। पावमान्यः पुनन्तु मा। प्राजापत्यं पवित्रं। शतोद्यामꣳ हिरण्मयं। तेन ब्रह्म विदो वयं। पूतं ब्रह्म पुनीमहे। इन्द्रस्सुनीती सहमा पुनातु। सोमस्स्वस्त्या वरुणस्समीच्या। यमो राजा प्रमृणाभिः पुनातु मा। जातवेदा मोर्जयन्त्या पुनातु। ॐ भूर्भुवस्सुवः।

ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीस्स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजं। शन्नो अस्तु द्विपदे। शं चतुष्पदे।ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि।

ॐ शान्तिश्शान्तिश्शान्तिः।

Appendix H: Narayana Sooktam & Mantra Pushpam

Narayana Sooktam given below can optionally be chanted before chanting mantra pushpam given after it (see below).

ॐ सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवं। विश्वं नारायणं देवमक्षरं परमं पदं। विश्वतः परमान्नित्यं विश्वं नारायणꣳ हरिं। विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति। पतिं विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतं। नारायणं महाज्ञेयं विश्वात्मानं परायणं। नारायणपरो ज्योतिरात्मा नारायणः परः। नारायणपरं ब्रह्म तत्त्वं नारायणः परः। नारायणपरो ध्याता ध्यानं नारायणः परः। यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा॥ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशंभुवं। पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखं। अधो निष्ट्या वितस्त्यांते नाभ्यामुपरितिष्ठति। ज्वालमालाकुलं भाती विश्वस्यायतनं महत्। सन्ततꣳ शिलाभिस्तु लंबत्याकोशसन्निभं। तस्यांते सुषिरꣳ सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितं। तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः। सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः। तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता। संतापयति स्वं देहमापादतलमस्तकः। तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः। नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा। तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्॥

Main text of mantra pushpam is given below.

ॐ योपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति। चंद्रमा वा अपां पुष्पं। पुष्पवान् प्रजावान् पशुमान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। अग्निर्वा अपामायतनं। आयतनवान् भवति। योऽग्नेरायतनं वेद। आयतनवान् भवति। आपो वा अग्नेरायतनं। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। वायुर्वा अपामायतनं। आयतनवान् भवति। यो वायोरायतनं वेद। आयतनवान् भवति। आपो वै वायोरायतनं। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। असौ वै तपन्नपामायतनं। आयतनवान् भवति। योऽमुष्य तपत आयतनं वेद। आयतनवान् भवति। आपो वा अमुष्य तपत आयतनं। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। चंद्रमा वा अपामायतनं। आयतनवान् भवति। यश्चंद्रमस आयतनं वेद। आयतनवान् भवति। आपो वै चंद्रमस आयतनं। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। नक्षत्राणि वा अपामायतनं। आयतनवान् भवति। यो नक्षत्राणामायतनं वेद। आयतनवान् भवति। आपो वै नक्षत्राणामायतनं। आयतनवान् भवति। य एवं वेद। यो

ऽपामायतनं वेद। आयतनवान् भवति। पर्जन्यो वा अपामायतनं। आयतनवान् भवति। यः पर्जन्यस्यायतनं वेद। आयतनवान् भवति। आपो वै पर्जन्यस्यायतनं। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतन वान् भवति। संवत्सरो वा अपामायतनं। आयतनवान् भवति। यस्संवत्सरस्यायतनं वेद॥ आयतनवान् भवति। आपो वै संवत्सरस्यायतनं। आयतनवान् भवति। य एवं वेद। योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति॥

ॐ राजाधिराजाय प्रसह्यसाहिने। नमो वयं वैश्रवणाय कुर्महे। स मे कामान्कामकामाय मह्यं। कामेश्वरो वैश्रवणो द दातु। कुबेराय वैश्रवणाय। महाराजाय नमः॥


ॐ तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततं॥ तद्विप्रासो विपन्यवो जागृवाꣳ सस्समिंधते। विष्णोर्यत्परमं पदं। ॐ ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिंगळं। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः। ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥ ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्॥ आकाशात् पतितं तोयं यदा गच्छति सागरं। सर्व देव नमस्कारः माधवं प्रति गच्छति॥

Appendix I: Arrangement of Peetha

When various deities are invoked in the pooja, their position will be marked as a code (e.g. L1, G4, G3A, D6, LG1, LSN *etc*) in the manual. Please refer to the picture below to identify.

Lokapalakas are marked as L1, L2 *etc*.
Grahas are marked as G1, G2 *etc.*
Adhidevatas (ruling deities) of grahas are marked as G1A, G2A *etc*.
Pratyadhidevatas (co-ruling deities) of grahas are marked as G1P, G2P *etc*.
Dikpalakas are marked as D1, D2 *etc*.

To understand the above groups of deities better, refer to the “Parivaara Devataa Poojaa” section in the manual.


EAST
D8
D9
D1
D2
G4P
G4
G4A
Green Mung Dal
G6P
G6
G6A
Val dal
G2P
G2
G2A
Rice
SOUTH
G5P
G5A
G5
D7
Chick peas
L1
L2
L4
L3
L5
L6
Rice
K
Rice
G1P
G1
G1A
Wheat
G3P
G3
G3A
Tur dal
D3
LSN
LG1
G9P
G9
G9A
Masoor dal
G7P
G7
G7A
Sesame
G8P
G8
G8A
Black gram
Urad dal
All small circles
Rice
D6
D5
WEST
D10
LG2
D4